## षष्ठाष्टमाभ्यां ञ च। (५०/१९९६)

भागे इत्येव, अच्छन्दसि इति च। षष्ठाष्टमाभ्यां[1] भागे अभिधेये अच्छन्दसि विषये ञः प्रत्ययो भवति। चकाराद् अन् च[2]। षष्ठो भागः षाष्ठः, षष्ठः। आष्टमः, अष्टमः॥

## मानपश्वङ्गयोः कन्लुकौ च। (५१/१९९७)

भागे इत्येव। षष्ठाष्टमाभ्यां यथासङ्ख्यं कन्लुकौ च भवतो मानपश्वङ्गयोर्भागयोरभिधेययोः। षष्ठको भागो मानं चेत् [3]तद् भवति। अष्टमो भागः पश्वङ्गं चेत् [4]तद् भवति। [5]कस्य लुक्? ञस्य लुक्। अनो वा। चकाराद् यथाप्राप्तं च। षाष्ठः, [6]षष्ठः। आष्टमः, [7]अष्टमः। मानपश्वङ्गयोः इति किम्? षाष्ठः, षष्ठः। आष्टमः, अष्टमः॥

## एकादाकिनिच् चासहाये। (५२/१९९८)

एकशब्दादसहायवाचिनः स्वार्थे आकिनिच् प्रत्ययो भवति। चकारात् कन्लुकौ च। आकिनिचः कनो वा लुग् विज्ञायते। स च[8] विधानसामर्थ्यात् पक्षे भवति। एकाकी, एककः, एकः। असहायग्रहणं [9]सङ्ख्याशब्दनिरासार्थम्। तदुपादाने हि द्विबह्वोर्न स्यात्[10], एकाकिनौ, एकाकिनः[11]॥

## भूतपूर्वे चरट्। (५३/१९९९)

पूर्वं भूतः इति विगृह्य सुप्सुपेति समासः। भूतपूर्वशब्दोऽतिक्रान्तकालवचनः। प्रकृतिविशेषणं चैतत्। [12]भूतपूर्वत्वविशिष्टेऽर्थेवर्तमानात् प्रातिपदिकात् स्वार्थे चरट् प्रत्ययो भवति। आढ्यो भूतपूर्वः आढ्यचरः। [13]सुकुमारचरः। टकारो ङीबर्थः। आढ्यचरी[14]॥

## षष्ठ्या रूप्य च। (५४/२०००)

षष्ठ्यन्तात् प्रातिपदिकात्[15] रूप्यः प्रत्ययो भवति। चकाराच् चरट् च। षष्ठ्यन्तात् [16]प्रत्ययविधानात् संप्रति [17]भूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणं, न तु [18]प्रकृत्यर्थविशेषणम्। देवदत्तस्य भूतपूर्वो गौः देवदत्तरूप्यः, देवदत्तचरः[19]॥

---

1. शब्दाभ्याम् इत्यधिकम् क. फ. ह. 2. यथासङ्ख्यमत्र नेष्यते इत्यधिकम् ड. 3–4. तद् नास्ति फ. 5. कस्य लुक् नास्ति ड. 6–7. नास्ति फ. ह. 8. शब्दात् फ, सामर्थ्यात् क. 9. सङ्ख्यानिरासार्थम् ड. ग. ह. 10. एकाकी इत्यधिकम् क. 11. एकवचनस्य एकवचनत्वात् इत्यधिकम् ड. 12. भूतपूर्वविशिष्टेऽर्थे ह. 13. स्वर्गमार्गचरः क, दर्शनीयचरः ड. 14. सुकुमारचरी इत्यधिकम् क. 15. भूतपूर्वे इत्यधिकम् ह, भूतपूर्वे अर्थे इत्यधिकम् क. ड. 16. प्रत्ययविधाने क. ड. 17. भूतपूर्वस्य ग्रहणं प्रत्ययान्तस्य प्रतियोगिनः विशेषणम् क. 18. प्रकृत्यर्थस्य ड. ह. 19. यज्ञदत्तरूप्यः यज्ञदत्तचरः इत्यधिकम् ड. ह.